# Shri Ranganatha Suprabhatam

# શ્રીરઙ્ગનાથસુપ્રભાતમ્

## Document Information

Text title : Ranganatha Suprabhatam

File name : ranganAthasuprabhAtam.itx

Category : vishhnu, suprabhAta, aShTaka

Location : doc_vishhnu

Proofread by : Aruna Narayanan

Latest update : March 26, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

*sanskritdocuments.org*

# શ્રીરઙ્ગનાથસુપ્રભાતમ્

અમ્ભોરુહાણિ વિકસન્ત્યરુણસ્ય ભાસા
શક્રસ્ય દિગ્ભવતિ પાટલિતા તથૈવ ।
મ્લાના ભવત્યુડુગણસ્ય રુચિર્જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧॥

ભૃઙ્ગાઃ પતન્તિ કુમુદાનિ વિહાય પદ્મે-
ષ્વાર્તં રથાઙ્ગમિથુનં સમુપૈતિ યોગમ્ ।
રૌતીહ પક્ષિપરિષત્પરિતો જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨॥

ઉદ્યાનસદ્મસુ વિહૃત્ય સહ પ્રિયાભિ-
ર્નક્તં યુવાન ઉપયાન્તિ પુનર્ગૃહાણિ ।
ચન્દ્રો ન ભાતિ સહ દીપગણૈર્જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૩॥

નક્તં પ્રપાસુ પથિકાઃ સુખસુપ્તિભાજો
નિદ્રાં વિહાય પરિતઃ સ્વપથાન્ પ્રયાન્તિ ।
શોશ્રૂયતે નિગમપાઠરવો જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૪॥

વિપ્રા ગૃહીતસકલોપકરાઃ પ્રયાન્તિ
સ્નાનાદિકર્મકરણાય કવેરકન્યામ્ ।
સઙ્કલ્પયન્તિ વનિતા વસતીર્જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૫॥

સહ્યાદ્રિજાપયસિ ચોષસિ યાયજૂકાઃ
સ્નાત્વાગ્નિહોત્રશરણે પ્રણયન્તિ વહ્નીન્ ।
વીથ્યાં પરિભ્રમતિ ભક્તતતિર્જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૬॥

ગોવાજિહસ્તિગણિકાઃ પુરતઃ સ્થિતાસ્તે
વીણાધ્વનિઃ પરિજના જલપૂર્ણકુમ્ભઃ ।
સજ્જાર્ચકાશ્ચ સકલા ઇતરે જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૭॥

વેદાન્તયુગ્મમુભયે વિબુધાશ્ચ સર્વે
ત્વાં બોધયન્તિ મુદિતાઃ સ્તુતિભિઃ પ્રિયાભિઃ ।
ઉત્તિષ્ઠ શેષશયનાદવ તાન્ જય ત્વં
શ્રીરઙ્ગનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૮॥

ઇતિ શ્રીરઙ્ગનાથસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Ranganatha Suprabhatam*
pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*